"यथाकाशस्थितो नित्यं वायुः सर्व्वत्रगो महान् ।
तथा सर्व्वाणि भूतानि मत्स्थानीत्युपधारय ॥")

सर्व्वत्रगामी,[न्]पुं, (सर्व्वत्र गच्छतीति । गम + णिनिः ।) वायुः । इति शब्दचन्द्रिका ॥ सर्व्वदिग्देशकाले गमनकर्त्तरि, त्रि ॥

सर्व्वथा, व्य, (सर्व्वेण प्रकारेण । सर्व्व + "प्रकारवचने थाल् ।" ५ । ३ । २३ । इति थाल् ।) सर्व्वप्रकारम् । इति व्याकरणम् ॥ (यथा, मनुः । २ । १५ ।
"उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥")
प्रतिज्ञा । भृशम् । हेतुः । इति शब्दरत्नावली ॥

सर्व्वदमनः,पुं,(सर्व्वान् दमयतीति । दम + ल्युः ।) भरतराजः । स तु शकुन्तलापुत्त्रः । इति त्रिकाण्डशेषः ॥ (अस्य नामनिरुक्तिर्यथा महाभारते । १ । ७४ । ५—७ ।
"षड्वर्ष एव बालः स कण्वाश्रमपदं प्रति ।
सिंहान् व्याघ्रान् वराहांश्च महिषांश्च गजांस्तथा ॥
बबन्ध हृष्टे बलवानाश्रमस्य समीपतः ।
आरोहन् दमयंश्चैव क्रीडंश्च परिधावति ॥
ततोऽस्य नाम चक्रुस्ते कण्वाश्रमनिवासिनः ।
अस्त्वयं सर्व्वदमनः सर्व्वान् हि दमयत्यसौ ॥
स सर्व्वदमनो नाम कुमारः समपद्यत ॥"*॥
सर्व्वदमनकर्त्तरि, त्रि । इति व्याकरणम् ॥)

सर्व्वदर्शी, [न्] पुं, (सर्व्वं पश्यतीति । दृश + णिनिः ।) बुद्धः । इति शब्दरत्नावली ॥ सकलदर्शनकर्त्तरि, त्रि ॥ (यथा, रामायणे । २ । १०६ । ६ ।
"सर्व्वज्ञः सर्व्वदर्शी च बुद्धिमांश्चासि राघव ! ॥")

सर्व्वदा, व्य, (सर्व्व + "सर्व्वैकान्यकिंयत्तदः काले दा ।" ५ । ३ । १५ । इति दा ।) सर्व्वस्मिन् काले इत्यमरः । ३।४।२२॥ (यथा, नरसिंहपुराणे । १२ । ५६ ।
"तत्पादपद्मे देवेश भक्तिं मे देहि सर्व्वदा ।
यदि तुष्टो ममाद्य त्वमन्यदेकं वृणोम्यहम् ॥")

सर्व्वदुःखक्षयः,पुं,(सर्व्वेषां दुःखानां क्षयो यत्र ।) मोक्षः । इति हेमचन्द्रः ॥ सकलपीडानाशश्च ॥

सर्व्वदेवमुखः, पुं, (सर्व्वेषां देवानां मुखं यत्र ।) अग्निः । इति जटाधरः ॥

सर्व्वद्राङ्[च्]त्रि, सर्व्वस्य पूजकः । सर्व्वानञ्चति इत्यर्थे क्विप्प्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

सर्व्वधारी,[न्]पुं,(सर्व्वं धरतीति । धृ + णिनिः ।) कालचक्रस्य द्वाविंशवर्षः । इति केचित् ॥ (यथा, बृहत्संहितायाम् । ८ । २७ ।
"त्वाष्ट्रे युगे सर्व्वजिदाद्य उक्तः
संवत्सरोऽन्यः खलु सर्व्वधारी ।
तस्मात् विरोधी विकृतः खरश्च ।
शस्तो द्वितीयोऽत्र भवाय शेषाः ॥"*॥
सर्व्वधारके, त्रि ॥)

सर्व्वधुरावहः, पुं, (सर्व्वा चासौ धूश्चेति । सर्व्वधुरा । ऋक्पूरित्यः । वहतीति । वह + अच् । सर्व्वधुराया वहः ।) सकलभारवाहकः । रथलाङ्गलादीनां भारवाहकगवादिः । इत्यमरः ॥

सर्व्वधुरीणः, पुं, (सर्व्वधुरां वहतीति । "खः सर्व्वधुरात् ।" ४ । ४ । ७८ । इति खः ।) सकलभारवाहकः । रथलाङ्गलादीनां भारवाहकगवादिः । इत्यमरः । २ । ८ । ६६ ॥

सर्व्वन्दमः, पुं, (सर्व्वं दमयतीति । दम + अच् । द्वितीयाया अलुक् ।) भरतराजः । स तु शकुन्तलापुत्त्रः इति हेमचन्द्रः ॥

सर्व्वपा, स्त्री, (सर्व्वं पातीति । पा + कः । टाप् ।) बलिराजपत्नी । इति केचित् ॥ सर्व्वरक्षणकर्त्तरि सर्व्वपानकर्त्तरि च त्रि ॥

सर्व्वपूर्णत्वं,क्ली, (सर्व्वैर्द्रव्यैः पूर्णत्वम् ।) सम्भारः । इति त्रिकाण्डशेषः ॥

सर्व्वप्रियः,त्रि,सर्व्वेषां जनानां प्रियः । सकलजनवल्लभः ॥ सर्व्वस्य शिवस्य प्रियः । सर्व्वः प्रियो यस्येति वा । शिवभक्तः ॥

सर्व्वभक्षा,स्त्री,(सर्व्वान् भक्षयतीति । भक्ष + अण् छागी । इति हेमचन्द्रः ॥ सर्व्वभक्षणकर्त्तरि, त्रि ॥ (यथा, महाभारते । १ । ६ । १४ ।
"इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् ।
शशापाग्निमतिक्रुद्धः सर्व्वभक्षो भविष्यसि ॥")

सर्व्वमङ्गला, स्त्री, (सर्व्वाणि मङ्गलानि अस्याः ।) दुर्गा । इत्यमरः ॥ अस्या व्युत्पत्तिर्यथा,—
"मङ्गलं मोक्षवचनं चाशब्दो दातृवाचकः ।
सर्व्वान्मोक्षान् या ददाति सा एव सर्व्वमङ्गला ॥
हर्षे सम्पदि कल्याणे मङ्गलं परिकीर्त्तितम् ।
तान् ददाति च या देवी सा एव सर्व्वमङ्गला ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥
अपि च ।
"सर्व्वमङ्गलशब्दश्च सम्पूर्णैश्वर्य्यवाचकः ।
आकारो दातृवचनस्तस्मात् सा सर्व्वमङ्गला ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे सर्व्वमङ्गलास्तोत्रं २७ अध्यायः ॥ अन्यच्च ।
"सर्व्वाणि हृदयस्थानि मङ्गलानि शुभानि च ।
ददाति चेप्सितान् लोके तेन सा सर्व्वमङ्गला ॥"
इति देवीपुराणे ४५ अध्यायः ॥

सर्व्वमयः, त्रि, सर्व्वात्मकः । सर्व्वशब्दात् मयट्प्रत्ययेन निष्पन्नः ॥ (यथा, मार्कण्डेये ।८८।३३।
"आप्याय्यते यतो यज्ञास्तदाधारा हुताशन ।
अतः सर्व्वस्य योनिस्त्वं वह्ने सर्व्वमयस्तथा ॥")

सर्व्वमूल्यं, क्ली, (सर्व्वस्य मूल्यम् ।) कपर्दकम् । इति त्रिकाण्डशेषः ॥

सर्व्वमूषकः,पुं,(सर्व्वान् मुष्णातीति । मुष + ण्वुल् । पृषोदरादित्वात् साधुः ।) कालः । इति हेमचन्द्रः ॥

सर्व्वरसः, पुं, (सर्व्वो रसो यत्र ।) सूरी । पण्डितः । इति शब्दरत्नावली ॥ धूनकः । इत्यमरः ॥ वाद्यभाण्डम् । तत्तु वीणाभेदः । इति मेदिनी ॥ लवणरसः । इति हेमचन्द्रः ॥(मधुरादिरसः । यथा, भागवते । २ । ६ । १ ।
"वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः ।
हव्यकव्यामृतान्नानां जिह्वासर्व्वरसस्य च ॥"
सर्व्वरसविशिष्टे, त्रि । यथा, छान्दोग्योपनिषदि । ३ । १४ । २ ।
"सर्व्वकामः सर्व्वगन्धः सर्व्वरसः इति ॥")

सर्व्वरसोत्तमः, पुं, (सर्व्वरसेषु उत्तमः ।) लवणरसः । इति हेमचन्द्रः ॥

सर्व्वरात्रः, पुं, (सर्व्वा रात्रिः । "अहःसर्व्वैकदेशसंख्यातपुण्याच्च रात्रेः ।" ५ । ४ । ८७ । इति अच् ।) समस्तरजनी । इति सिद्धान्तकौमुदी ॥

सर्व्वरी, स्त्री, शर्व्वरी । रात्रिः । इति वर्णमालाशब्ददर्शनात् ॥

सर्व्वरीकरः, पुं, (सर्व्वर्य्याः करः ।) चन्द्रः । इति धरणिः ॥

सर्व्वर्त्तुपरिवर्त्तः, पुं, (सर्व्वर्त्तूनां परिवर्त्तो यत्र ।) वत्सरः । इति जटाधरः ॥

सर्व्वर्त्तुफलं,क्ली, (सर्व्वर्त्तुजातं फलम् ।) सकलर्त्तुजातफलम् । यथा,—
"सर्व्वर्त्तुकुसुमाकीर्णे सर्व्वर्त्तुफलशोभिते ।
स्थिरच्छायद्रुमाकीर्णे सन्तानकवनाहृते ॥"
इति भविष्यपुराणे शिवरात्रिव्रतकथा ॥

सर्व्वरक्षककवचं, क्ली, (सर्व्वरक्षणं सर्व्वरक्षाकरं कवचम् ।) कवचविशेषः । यथा,—
"शिशोः स्वस्त्ययनं चक्रुस्तूर्णं ब्राह्मणपुङ्गवाः ।
हस्तं दत्त्वा शिशोर्गात्रे पपाठ कवचं द्विजः ॥
वदामि तत्ते विप्रेन्द्र कवचं सर्व्वरक्षणम् ।
तद्दत्तं मायया पूर्व्वं ब्रह्मणे नाभिपङ्कजे ॥
निद्रिते जगतां नाथे जले च जलशायिनि ।
भीताय स्तुतिकर्त्रे च मधुकैटभयोर्भयात् ॥
योगनिद्रोवाच ।
दूरीभूतं कुरु भयं भयं किन्ते मयि स्थिते ।
स्थितायां मयि च ब्रह्मन् सुखी तिष्ठ जगत्पते ॥*
श्रीहरिः पातु ते वक्त्रं मस्तकं मधुसूदनः ।
श्रीकृष्णश्चक्षुषी पातु नासिकां राधिकापतिः ॥
कर्णयुग्मञ्च कण्ठञ्च कपालं पातु माधवः ।
कपोलं पातु गोविन्दः केशांश्च केशवः स्वयम् ॥
अधरौष्ठं हृषीकेशो दन्तपंक्तिं गदाग्रजः ।
रासेश्वरश्च रसनां तालुकं वामनो विभुः ॥
वक्षः पातु मुकुन्दस्ते जठरं पातु दैत्यहा ।
जनार्द्दनः पातु नाभिं पातु विष्णुश्च ते हनुम् ॥
नितम्बयुग्मं गुह्यञ्च पातु ते पुरुषोत्तमः ।
जानुयुग्मं जानकीशः पातु ते सर्व्वदा विभुः ॥
हस्तयुग्मं नृसिंहश्च पातु सर्व्वत्र सङ्कटे ।
पादयुग्मं वराहश्च पातु ते कमलोद्भवः ॥
ऊर्द्ध्वं नारायणः पातु अधस्तात् कमलापतिः ।
पातु पूर्व्वे च गोपालः पातु वह्नौ दशास्यहा ॥
वनमाली पातु याम्यां वैकुण्ठः पातु नैरृते ।
वारुणे वासुदेवश्च पातु ते जलजासन ! ॥
पातु ते सन्ततमजो वायव्यां विष्टरश्रवाः ।
उत्तरे च सदा पातु सोऽनन्तोऽनन्तकः स्वयम् ॥
ऐशान्यामीश्वरः पातु सर्व्वत्र पातु शत्रुजित् ।
जले स्थले चान्तरीक्षे निद्रायां पातु माधवः ॥*॥